# Akhilandeshvari Pushpamala Stotram

# અખિલાણ્ડેશ્વરીપુષ્પમાલાસ્તોત્રમ્

## Document Information

Text title : Akhilandeshvari Pushpamala Stotram

File name : akhilANDeshvarIpuShpamAlA.itx

Category : devii

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : Matrika pushpam

Latest update : April 3, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

Akhilandeshvari Pushpamala Stotram

# અખિલાણ્ડેશ્વરીપુષ્પમાલાસ્તોત્રમ્

અધ્વાતીતપદે અલઙ્કૃતશિવે અર્થાન્તરર્થે પરે
    અત્યર્થે અમલાશયે અતિદયે અર્ધેન્દુભૂષોજ્જ્વલે ।
અધ્યક્ષે અમરાઙ્ગનાપરિવૃતે અધ્યાત્મવિદ્યામયે
    અવ્યક્તે અચલાધિરાજતનયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧॥

આદ્યે આગમસમ્પ્રદાયનિપુણે આચાર્યવર્યાર્ચિતે
    આધારાદિસરોજપીઠનિલયે આલોલનીલાલકે ।
આતામ્રાધરચારુમન્દહસિતે આપીનવક્ષોરુહે
    આબ્રહ્માચ્યુતશઙ્કરાર્ચિતપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨॥

ઇચ્છાજ્ઞાનસમસ્તશક્તિસહિતે ઇન્દીવરશ્યામલે
    ઇન્દ્રોપેન્દ્રવરપ્રદે ઇભવનાધીશે ઇનારાધિતે ।
ઇજ્યે ઇન્દુનિભાનને ઇભનુતે ઇષ્ટાર્થસિદ્ધિપ્રદે
    ઇન્દ્રાણીનમિતે ઇભાનનસુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩॥

ઈશે ઈશવિરિઞ્ચિશૌરિવરદે ઈડ્યાલિ ઈશાત્મિકે
    ઈર્ષ્યાદૂષિતચિત્તદૂરચરણે ઈશપ્રિયે ઈશ્વરિ ।
ઈડ્યે ઈશ્વરવામભાગનિલયે ઈઙ્કારક્લૃપ્તોદયે
    ઈશિત્વાદિમહાવિભૂતિનિલયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪॥

ઉદ્યદ્ભાનુસહસ્રકોટિકિરણે ઉર્વીધરેન્દ્રાત્મજે
    ઉત્ફુલ્લામ્બુજલોચને ઉભયકાવેર્યન્તરાલાશ્રયે ।
ઉદ્યચ્ચન્દ્રનિભાનને ઉરુતરે ઉચ્ચાસને ઉજ્જ્વલે
    ઉદ્દામદ્યુતિપુઞ્જમઞ્જુલતરે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૫॥

ઊહાપોહવિવેકબાહ્યનિલયે ઊનાતિરિક્તોજ્જ્વલે
    ઊર્જસ્વન્મણિમેખલાવિલસિતે ઊરીકૃતાર્થપ્રિયે ।
ઊર્ધ્વાધોદ્ભવયોગમૂલનિલયે ઊષ્માપહારોજ્જ્વલે
    ઊધઃ ક્ષીરસુધાધૃતત્રિભુવને વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૬॥

ઋગ્વેદાદિનિષેવિતે ઋતુનતે ઋદ્ધાનુકમ્પાવહે ।
ઋદ્ધામોદમુખેપ્સિતે ઋતુનુતે ઋક્ષૌઘસંસેવિતે ।
ઋક્ષાધીશકલાન્વિતે ઋણતમોભાસ્વત્પદામ્ભોરુહે
ઋદ્ધ્યાપૂરિતવિષ્ટપત્રયનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૭॥

રૂપારૂપસદાશિવાન્તરગતે રૂપે સદા રૂપિણિ
રૂપાતીતપરાપરાર્થનિલયે રૂઢપ્રરૂઢાત્મિકે ।
નૃણાં જન્મજરાપહારનિલયે નૃત્રાણકલ્પદ્રુમે
નૃણાં પાપવિમોચનાદ્યફલદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૮॥

ક્લૃપ્તાશેષજગન્મહેશનિલયે ક્લૃપ્તાઙ્ગરાગોજ્જ્વલે
ક્લૃપ્તાક્લૃપ્તવિશઙ્ક્યમાનવિલસન્મધ્યાવલીરઞ્જિતે ।
લિઙ્ગારાધનતત્પરે લિકુચરાજત્પાણિપઙ્કેરુહે
ક્લૃપ્તાકલ્પમનોહરાઙ્ગલતિકે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૯॥

લૂતાધીશગજેન્દ્રપૂજિતપદે લૂનાહિતેશાન્વિતે।
ક્લીઙ્કારાઙ્કિત બિન્દુપીઠનિલયે ક્લીઙ્કારરૂપેડિતે ।
લૂતાતન્તુજડીકૃતેશનિલયે લૂનાહિવલ્લીદલે
લૂતાક્ષ્માપતિમુક્તિદાતૃમહિલે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૦॥

એકે એકમહામ્બુરાશિનિલયે એકાન્તક્લૃપ્તોદયે
એકાનેકતયા વિભક્તભુવને એકાતપત્રોજ્જ્વલે ।
એણીચારુવિલોલલોચનયુગે એકાવલીભૂષણે
એતત્તત્ત્વમયાણિમાદિવરદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૧॥

ઐઙ્કારાસનમધ્યપીઠનિલયે ઐન્દ્રાદિલોકપ્રદે
ઐરાવત્યુપમાનદેહલતિકે ઐન્દ્રાદિશક્તીડિતે ।
ઐઙ્કારાક્ષરવેદવેદ્યવિભવે ઐશ્વર્યદાનેક્ષણે
ઐમૈમિત્યનુસન્દધાનભુવને વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૨॥

ઓમિત્યેકપદાવલીડિતપદે ઓજોવિશેષાન્વિતે
ઓષ્ઠાધાવિતબિમ્બવિદ્રુમલતે ઓઘત્રયારાધિતે ।
ઓઘૈરપ્સરસાં સદાપરિવૃતે ઓતાખિલાર્થાધિપે
ઓજોરાજિતવાગ્વિભૂતિવિનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૩॥

ઔશીરાદિસુગન્ધિશોભનકચે ઔત્પત્તિજાલપ્રિયે

ઔદાસીન્યવિભિન્નદૈત્યવિભવે ઔપાધિકોપાન્વિતે ।
ઔદાર્યાકરપાદપઙ્કજયુગે ઔપમ્યહીનાનને
ઔમાકાન્તપદપ્રદાર્તિહપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૪॥

અમ્ભોજાસનમુખ્યસેવિતપદે અમ્ભોધરશ્યામલે
અઙ્ગાકલ્પિતરત્નભૂષણશતે અણ્ડૌઘસંસેવિતે ।
અમ્બ્વાકાશતયા વિભક્તભુવને અમ્ભોરુહાઙ્ઘ્રિદ્વયે
અજ્ઞાયાન્તકસૂદનપ્રિયતમે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૫॥

અસ્તાઘે અવનમ્રદેવનિવહે અસ્તોકભાગ્યોદયે
અર્ધાધિક્યમનોહરે અચલજે અષ્ટાક્ષરૈરર્ચિતે ।
અર્ધાતીતમનોજ્ઞભૂષણશતે અક્ષીણસૌભાગ્યદે
અર્કામ્ભોરુહવૈરિવહ્નિનયને વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૬॥

કાવેરીપુલિનાલયે કમલજે કામારિવામાલયે
કારુણ્યામૃતલોચને કવિનુતે કન્દર્પકાન્તિપ્રદે ।
કલ્યાણિ ક્ષિતિલોકકલ્પલતિકે કારુણ્યવારાન્નિધે
કાલામ્ભોધરકમ્રકુણ્ડલધરે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૭॥

ખર્વાટે ખગકેતનાનુજવરે ખટ્વાઙ્ગપાણિસ્તુતે
ખર્વાખર્વવિવર્જિતે ખગમયૂખારાધિતે ખડ્ગિનિ ।
ખદ્યોતેશવરપ્રદે ખગનુતે ખદ્યોતકોટિપ્રભે
ખણ્ડેન્દૂજ્જ્વલશેખરે ખગચરે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૮॥

ગઙ્ગાવર્તસમાનનાભિકુહરે ગણ્ડોજ્જ્વલત્કુણ્ડલે
ગન્ધર્વાસુરસિદ્ધકિન્નરનુતે ગન્ધોત્તમાલેપિતે ।
ગમ્ભીરામૃતસિન્ધુમધ્યનિલયે ગામ્ભીર્યધૈર્યાધિકે
ગઙ્ગોત્તુઙ્ગતરઙ્ગશેખરયુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૧૯॥

ગીતાનન્દમયે ગિરીશનમિતે ગીતપ્રિયારાધિતે
ગીતોલ્લાસિનિ ગીયમાનચરિતે ગીર્નાથસંસેવિતે ।
ગીષ્પદ્માવરદે ગિરીન્દ્રનિલયે ગીર્વાણવૃન્દાઞ્ચિતે
ગીતે ગીતમનોહરે ગિરિસુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૦॥

ગુપ્તે ગુપ્તતરે ગુહેશવરદે ગુચ્છોજ્જ્વલન્મલ્લિકે
ગુહ્યાચારગતે ગુરુસ્તનભરે ગુચ્છાર્ધહારોજ્જ્વલે ।
ગુલ્ફસ્થે ગુણમન્દિરે ગુરુવરે ગુલ્ફોલ્લસન્નૂપુરે

ગૂઢાર્થાન્તગતે ગુરૂત્તમનુતે વન્દેઽખિલાણ્ડેશ્વરિ । ૨૧
ઘણ્ટાઘોરનિનાદઘાતિતમહાદૈત્યે ઘનશ્યામલે
ઘર્માઘર્મમયૂખવહ્નિનયને ઘર્મપ્રશાન્તિપ્રદે ।
ઘોરાઘોરવિઘોષદાનવગણપ્રોદ્ઘુષ્ટઘોરારવે
ઘોરાઘૌઘનિવારણે ઘનનિભે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૨॥

ચાતુર્વર્ગ્યફલપ્રદે સુચરિતે ચામુણ્ડિરૂપોત્તરે
ચક્રાધિષ્ઠિતપાદપદ્મચતુરે ચન્દ્રાનને ચણ્ડિકે ।
ચન્દ્રોપેન્દ્રચરાચરાત્મકજગદ્રૂપે ચલત્કુણ્ડલે
ચઞ્ચલ્લોચનવઞ્ચિતેશ્વરશિવે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૩॥

છિદ્રઘ્નસ્મિતચન્દ્રિકાધવલિતે છાયેશ્વરદ્યોતિતે
છન્દાન્દોલિતભૂષણાઙ્કિતગલે છન્દશ્શ્રિયાલઙ્કૃતે ।
છાયાધીશ ધનઞ્જયેન્દુનયને છન્નાન્ધકારારુણે
છન્દોવૃન્દમહસ્સુકાન્તિનિલયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૪॥

જમ્બૂમૂલનિધે જનાર્દનનુતે જમ્ભારિસમ્ભાવિતે
જમ્બૂદ્વીપમનોજ્ઞકલ્પલતિકે જહ્ન્વાત્મજાશેખરે ।
જન્મવ્યાધિજરાપહે જલમયે જામ્બૂનદાલઙ્કૃતે
જમ્બૂનાથમનોહરે જનનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૫॥

ઝઞ્ઝાવાતતરઙ્ગિતપ્રવિમલ શ્રીનિર્ઝરાપ્લાવિતે
ઝઙ્કારીકૃતષટ્પદાલકભરે ઝાટિત્યબુદ્ધિપ્રદે ।
ઝર્ઝારારવભૂષણે ઝલઝલન્મઞ્જીરપાદામ્બુજે
ઝલ્લીમદ્દલઝર્ઝરસ્વનનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૬॥

જ્ઞાનાનન્દમહાસમુદ્રતરણે જ્ઞાનાત્મરૂપાપરે
જ્ઞાનજ્ઞેયમયે ત્વદઙ્ઘ્રિભજતાં જ્ઞાનપ્રદેઽજ્ઞાનિનામ્ ।
જ્ઞાનાજ્ઞાનમયસ્વરૂપિણિ શિવજ્ઞાનપ્રકાશપ્રદે
જ્ઞાતિક્ષેત્રકલત્રધાન્યધનદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૭॥

ટક્કાદ્યાયુધભૂષણોજ્જ્વલકરે ઠાવેક્ષ્યમાનાનને
ડિમ્ભાહુઙ્કૃતઢઙ્કૃતાસુરશરે ડોલાડિઢેશસ્મિતે ।
ડિમ્ભાકારતયા સુપાલિતજને ઢક્કારવોદ્ઘોષિતે
ઢણ્ઢણ્ડેતિ ઝટિક્વણાદિમહિતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૮॥

તત્ત્વાર્થપ્રતિપાદ્યમાનચરણે તત્ત્વત્રયોદ્દીપિકે

તત્ત્વાતીતપદે તપોધનનુતે તારેશચૂડામણે ।
તારુણ્યામૃતસિન્ધુમધ્યલતિકે તાર્ક્ષ્યધ્વજારાધિતે
તાપિચ્છસ્તબકદ્યુતે તનુલતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૨૯॥

સ્થાણુપ્રેમનિધે સ્થિતીશમહિતે સ્થૈર્યસ્થિતે સ્થાપિકે
સ્થાનાસ્થાનકૃતાર્થદેહિનિવહસ્થિત્યન્તસર્ગોદ્યતે ।
સ્થાનાધિક્યમનોહરે સ્થિરતરસ્થાણ્વન્તરાલાશ્રયે
સ્થૂલાગોચરદર્શને સ્થિતિમયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૦॥

દાક્ષાચારવરપ્રદે દમયુતે દક્ષે દયાઙ્કૂરિતે
દાન્તે દ્રષ્ટમનોહરદ્વિજવરે દન્તાવલારાધિતે ।
દાનાદાનવિદાનચોદનપરે દાતૃસ્વરૂપાપરે
દૈન્યાધ્યાત્મિકતાપહારિચરણે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૧॥

દિવ્યજ્ઞાનમયે દિવાકરનિભે દિવ્યામ્બરાલઙ્કૃતે
દિવ્યસ્ત્રીજનસેવિતે દ્વિજમયે દીક્ષાપ્રદાનોદ્યતે ।
દીપ્તે દીપ્તશશાઙ્કવહ્નિનયને દીનાદિમુક્તિપ્રદે
દિક્પાલાદિદિગમ્બરાર્ચિતપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૨॥

દુર્ભિક્ષાદિસમસ્તદુઃખહરણે દુઃશીલતાપાપહે
દુર્ગાદ્યાવૃતિદેવતાર્ચિતપદે દૂર્વાઙ્કુરશ્યામલે ।
દુર્લક્ષ્યાગમચિત્તદૂરચરિતે દુર્ગાદિવસ્યાપરે
દુર્વાસાદિમુનીશ્વરસ્તુતિપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૩॥

ધર્મિષ્ઠે ધરણીધરેન્દ્રતનયે ધારાધરોદ્યત્પ્રભે
ધમ્મિલ્લાઞ્ચિતમલ્લિકાદિકુસુમે ધર્માદિસંસેવિતે ।
ધર્માદ્યર્થચતુષ્ટયસ્થિતિપદેધામત્રયારાધિતે
ધન્યે ધાર્મિકચિત્તનિત્યનિલયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૪॥

નાનારત્નવિભૂષણે નવઘનશ્યામે નટેશપ્રિયે
નક્ષત્રેશધરે નગેન્દ્રનિલયે નાગારિવાહાનુજે ।
નાનાદેવવૃતે નરોત્તમનુતે નાથે નૃમુક્તિપ્રદે
નાકૌકોગણનમ્યમાનચરણે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૫॥

નીહારાચલકન્યકે નિગમગે નિત્યાત્મિકે નિર્મલે
નિઃશેષાણ્ડસુમાતૃકે નિશિચરારાધ્યે નિશીશાઙ્કિ(ઞ્ચિ)તે ।
નીપારણ્યનિવાસનિત્યરસિકે નિર્નિદ્રપદ્મેક્ષણે

નિઃશોકાકૃતિકે નિરઞ્જનપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૬॥

પદ્મે પદ્મનિભાનને પરતરે પદ્માર્ચિતાઙ્ઘ્રિદ્વયે
પદ્મસ્તે પરદાનવારિવિનુતે પદ્માસનારાધિતે ।
પદ્માસ્યે પરલોકસાધનપરે પઞ્ચાક્ષરાલઙ્કૃતે
પક્ષાપક્ષવિવર્જિતે પરશિવે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૭॥

ફુલ્લામ્ભોજદલેક્ષણેન્દુવિકૃતાલીકાભિરામાનને
ફૂત્કારાહિફણાધરેન્દ્રરમણીનૃત્તાન્તરાલસ્થિતે ।
સ્ફાયત્પણ્ડિતસૂક્તિમર્મવિભવે સ્ફાટિક્યતેજોમય-
સ્ફૂર્જત્કાન્તિમયે ફણીન્દ્રવરદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૮॥

બાલેઽબાલપરાક્રમે બહુવિધે બાલપ્રવાલાધરે
બાલાદિત્યસમપ્રભે બહુનુતે બાલેન્દુભૂષોજ્જ્વલે ।
બન્ધુકારુણવિગ્રહે બહુવિધબ્રહ્માણ્ડભાણ્ડોદરિ
બ્રહ્માગસ્ત્યસુરેન્દ્રવન્દિતપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૩૯॥

ભાવાતીતપદપ્રવર્તિતગુણે ભાષે ભવારાધિતે
ભાવાઢ્યે ભવરોગભઞ્જનકરે ભદ્રે ભયચ્છેદિનિ ।
ભવ્યે ભાગ્યવદુત્તમેડ્યચરણે ભાગીરથીશાન્વિતે
ભાસ્વચ્ચન્દ્રવિલોચનાર્ચિતપદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૦॥

માયે મન્મથસેવિતે મરકતશ્યામે મનોજ્ઞામલે
માયામોહવિવર્જિતે મણિમયાકલ્પે મહામઞ્જુલે ।
માયાતીતમહામુનીદ્રવરદે માણિક્યકેયૂરકે
માલાલઙ્કરણે મતઙ્ગતનયે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૧॥

મિત્રાગ્નીન્દુવિલોચને મિહિરભે મીનોલ્લસલ્લોચને
મિથ્યાજ્ઞાનમનોઽતિદૂરચરણે મીનધ્વજારાધિતે ।
મીમાંસાદિ સમસ્ત શાસ્ત્રમહિતે મૃષ્ટાન્નદાનોદ્યમે
મિત્રોદ્ભાસિનિ મિત્રવહ્નિવિનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૨॥

મુગ્ધે મુગ્ધશશાઙ્કશેખરયુતે મૂલાગમાર્થોદયે
મુક્તે મૂષિકવાહનાર્ચિતપદે મૂર્તિત્રયારાધિતે ।
મલાધારગતે મુખાબ્જવિલસન્મુગ્ધસ્મિતે મુક્તિદે
મુદ્રામોદિતમાનસે મુનિનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૩॥

યજ્ઞે યજ્ઞફલપ્રદે યમનુતે યક્ષેશ્વરારાધિતે
    યક્ષ્મઘ્ને યમસૂદનપ્રિયતમે યજ્ઞેશસમ્પૂજિતે ।
યન્ત્રસ્થે યતિપૂજિતે યતિકૃતશ્રીચક્રભૂષોજ્જ્વલે
    યક્ષિણ્યાદિસમસ્તશક્તિવિનુતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૪॥

રામે રામવરપ્રદે રસકલે રાજીવપત્રાર્ચિતે
    રાકાચન્દ્રનિભે રમાર્ચિતપદે રાજાધિરાજાનતે ।
રમ્યે રાજતશૈલશૃઙ્ગનિલયે રત્યાપ્તપત્યા નુતે
    રાગદ્વેષવિહીનચિત્તસુલભે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૫॥

લાવણ્યામ્બુનિધે લલાટનયને લમ્બોદરારાધિતે
    લાક્ષારઞ્જિતપાદપદ્મયુગલે લમ્બાલકોદ્ભાસિતે ।
લઙ્કેશારિનુતે લયોદ્ભવકરે લક્ષ્મીપતીડ્યપ્રિયે
    લક્ષ્યાલક્ષ્યમનોજ્ઞમધ્યલતિકે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૬॥

વાચ્યે (વામે) વારિજલોચનાર્ચિતપદે વાગ્દેવતાઽઽરાધિતે
    વામાઘે વરશૈલરાજતનયે વામાદિશક્ત્યાત્મિકે ।
વશ્યાકર્ષણસિદ્ધિમૂલગુલિકે વાદિત્રનાદપ્રિયે
    વાણીવલ્લભવજ્રપાણિવરદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૭॥

શાન્તે શઙ્કરવલ્લભે શશિયુતે શાતોદરિ શ્યામલે
    શઙ્કાહીનવિશોકદે શતમખારાધ્યે શશાઙ્કાનને ।
શક્તે શક્તિધરાર્ચિતે શમધનાધીશાર્ચિતે શારદે
    શૈવાદ્યાગમપારગે શમધને વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૮॥

ષટ્ચક્રાન્તગતે ષડક્ષરમયે ષટ્ત્રિંશતત્ત્વાત્મિકે
    ષટ્પદ્માન્તપુરે ષડાનનનુતે ષટ્કોણસમ્ભાવિતે ।
ષડ્વક્ત્રદ્વિપવક્ત્રરામવરદે ષડ્ગ્રન્થિવન્દ્યાત્મિકે
    ષટ્શક્તિપ્રભવાત્મનઃ પ્રિયતમે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૪૯॥

સર્વાભીષ્ટફલપ્રદે સુમતિભિઃ સંસેવિતે સાત્ત્વિકૈઃ
    સર્વાલઙ્કરણે સદાશિવમયે સમ્પત્કરે સાક્ષિણિ ।
સાદિસ્થે સરસીરુહાક્ષિયુગલે સઙ્ઘટ્ટવક્ષોરુહે
    સાક્ષાત્કારિણિ સર્વલોકવરદે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૫૦॥

હાહાકારરવૈસ્ત્રિભિઃ સ્તુતપદે હારાભિરામેઽસમે
    હંસોલ્લાસિતરમ્યવિશ્વવિભવે હમ્બીજમૂલાઙ્કુરે ।

હસ્થે હસ્તિવનાલયે હરિહરબ્રહ્મેન્દ્રવન્દ્યેશ્વરિ
    હંસાતીતપદે હકારચરિતે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૫૧॥

ળમ્બીજે લકુળે લતામૃદુતનો ળઙ્કારસમ્પૂજિતે
    ળમ્બીજેન સુલક્ષિતેઽવ્યવિભવે ક્લીઙ્કારરૂપાન્વિતે ।
ળાન્તે હન્ત ગરે જવાત્સમુદિતે ત્રસ્તાન્સુરાન્વીક્ષ્ય તત્
    ળાન્તે કે વિનિયચ્છદીશમહિળે વન્દેઽખિલાણ્ડેશ્વરિ ॥ ૫૨॥

ક્ષોણીશાગ્ર્યપદૈકલક્ષણવિધિક્ષેપપ્રમાણેક્ષણે
    ક્ષિપ્રાદક્ષિણકુક્ષિશિક્ષણમનઃક્ષેત્રજ્ઞસંરક્ષિણિ ।
ત્ર્યક્ષાલક્ષ્યતિતિક્ષુદક્ષદમનક્ષાન્તાન્તસંવીક્ષણે
    ક્ષન્તવ્યં ક્ષિતિભૃત્સુતે સ્તુતિવચઃ ક્ષુદ્રં મદીયં શિવે ॥ ૫૩॥

ઇતિ ગિરિવરપુત્રીપાદરાજીવભૂષા
    ભુવનમમલયન્તી સૂક્તિસૌરભ્યસારૈઃ ।
શિવપદમકરન્દસ્યન્દિની મન્નિદાના
    મદયતુ કવિભૃઙ્ગાન્માતૃકાપુષ્પમ્ ॥ ૫૪॥

ઇતિ અખિલાણ્ડેશ્વરીપુષ્પમાલાસ્તોત્રં સમ્પૂર્ણમ્ ।
અક્ષરમાલિકા

Encoded and proofread by PSA Easwaran

---

*Akhilandeshvari Pushpamala Stotram*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*